# श्री दुर्गा अष्टोत्तर शत नाम स्तोत्रं

शतनाम प्रवक्ष्यामि शृणुष्व कमलानने |
यस्य प्रसादमात्रेण दुर्गा प्रीता भवेत् सती || १ ||

सती साध्वी भवप्रीता भवानी भवमोचनी |
आर्या दुर्गा जया चाद्या त्रिनेत्रा शूलधारिणी || २ ||

पिनाकधारिणी चित्रा चण्डघण्टा महातपा: |
मनो बुद्धिरहंकारा चित्तरूपा चिता चिति: || ३ ||

सर्वमन्त्रमयी सत्ता सत्यानन्द स्वरूपिणी |
अनन्ता भाविनी भाव्या भव्याभव्या सदागति: || ४ ||

शाम्भवी देवमाता च चिन्ता रत्नप्रिया सदा |
सर्वविद्या दक्षकन्या दक्षयज्ञविनाशिनी || ५ ||

अपर्णानेकवर्णा च पाटला पाटलावती |
पट्टाम्बर परीधाना कलमञ्जीररञ्जिनी || ६ ||

अमेयविक्रमा क्रूरा सुन्दरी सुरसुन्दरी |
वनदुर्गा च मातङ्गी मतङ्गमुनि पूजिता || ७ ||

ब्राह्मी माहेश्वरी चैन्द्री कौमारी वैष्णवी तथा |
चामुण्डा चैव वाराही लक्ष्मी श्च पुरुषाकृति: || ८ ||

विमलोत्कर्षिणी ज्ञाना क्रिया नित्या च बुद्धिदा |
बहुला बहुलप्रेमा सर्ववाहनवाहना || ९ ||





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

निशुम्भशुम्भ हननी महिषासुर मर्दिनी |
मधुकैटभ हन्त्री च चण्डमुण्ड विनाशिनी || १० ||

सर्वासुरविनाशा च सर्वदानव घातिनी |
सर्वशास्त्र मयी सत्या सर्वास्त्र धारिणी तथा || ११ ||

अनेकशस्त्र हस्ता च अनेकास्त्रस्य धारिणी |
कुमारी चैककन्या च कैशोरी युवती यतिः || १२ ||

अप्रौढा चैव प्रौढा च वृद्धमाता बलप्रदा |
महोदरी मुक्त केशी घोररूपा महाबला || १३ ||

अग्निज्वाला रौद्रमुखी कालरात्रिस्तपस्विनी |
नारायणी भद्रकाली विष्णुमाया जलोदरी || १४ ||

शिवदूती कराली च अनन्ता परमेश्वरी |
कात्यायनी च सावित्री प्रत्यक्षा ब्रह्मवादिनी || १५ ||

य इदं प्रपठेन्नित्यं दुर्गानामशताष्टकम् |
नासाध्यं विद्यते देवि त्रिषु लोकेषु पार्वति || १६ ||

धनं धान्यं सुतं जायां हयं हस्तिनमेव च |
चतुर्वर्गं तथा चान्ते लभेन्मुक्तिं च शाश्वतीम् || १७ ||

कुमारीं पूजयित्वा तु ध्यात्वा देवीं सुरेश्वरीम् |
पूजयेत् परया भक्त्या पठे न्नामशताष्टकम् || १८ ||



With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

www.viswakalyanam.org

तस्य सिद्धिर्भवेद् देवि सर्वै: सुरवरैरपि |
राजानो दासतां यान्ति राज्यश्रिय मवापनुयात् || १९ ||

गोरोचनालक्तक कुङ्कुमेन सिन्दूर कर्पूर मधु त्रयेण |
विलिख्य यन्त्रं विधिना विधिज्ञो भवेत् सदा धारयते पुरारि: || २० ||

भौमावास्यानिशामग्रे चन्द्रे शतभिषां गते |
विलिख्य प्रपठेत् स्तोत्रं स भवेत् सम्पदां पदम् || २१ ||

## इति श्री दुर्गा अष्टोत्तर शत नाम स्तोत्रं सम्पूर्णं





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133